सप्तमः पाठः

5KGFJR

# आदर्शपरिवारः

एकस्मिन् ग्रामे जगत्पालो नाम एकः सज्जनो वसति। तस्य पत्नी कला अस्ति। जगत्पालः सप्तत्रिंशद्वर्षीयः, कला द्वात्रिंशद्वर्षीया च स्तः। तौ दम्पती सुखेन निवसतः।



तयोः द्वे सन्तती स्तः, एकस्तनयः एका च तनया। तनयस्य नाम विवेकः तनयायाश्च नाम प्रतिभा अस्ति। विवेकः एकादशवर्षीयः प्रतिभा सप्तवर्षीया च। विवेकः सप्तमकक्षायां पठति, प्रतिभा तृतीयकक्षायां च।

आम्र-निम्ब-मधूकादिवृक्षाणां छायासु स्थितं जगत्पालस्य गृहमत्यन्तं रमणीयं वर्तते। जगत्पालः

एकः उद्योगी कुशलश्च कृषकः। सः सर्वदा कृषिकर्मणि संलग्नः स्वकर्तव्यं पालयति। सः परिश्रमं कृत्वा स्वक्षेत्रे पर्याप्तम् अन्न्ाम्, शाकं, फलं च उत्पादयति। तस्य गृहे एका श्वेतवर्णा धेनुः वर्तते। सा बहु दुग्धं ददाति।

विवेकः प्रतिभा च स्वास्थ्यप्रदं पुष्टिदं च भोजनं कुरुतः। तयोः शाकस्य फलस्य चाधिक्यं वर्तते। तौ यथेच्छं पयः पिबतः। स्वच्छानि वस्त्राणि परिधाय तौ मातरं पितरं च प्रणम्य पठनाय स्वविद्यालयं प्रति गच्छतः।

कला एका स्वस्था आदर्शभूता च गृहिणी अस्ति। सा सदा स्वकार्याणि सम्पादयति, पत्युः सन्तानयोः स्वास्थ्यविषये सावधाना च वर्तते। पतिः जगत्पालोऽपि स्वपत्नीं कलां बहुमन्यते। अनेन प्रकारेण परस्परं स्नेह-सौहार्द-बद्धः अयं लघुपरिवारः एकः आदर्शपरिवारः अस्ति। लघुपरिवारः एव सुखी परिवारः। आहारस्य वस्त्रस्य गृहस्य च व्यवस्था लघुपरिवारे एव समुचितरूपेण भवति। लघुपरिवारेणैव समाजस्य राष्ट्रस्य च कल्याणं भवितुम् अर्हति।

## शब्दार्थ

सप्तत्रिंशत् = सैंतीस। द्वात्रिंशत् = बत्तीस। सन्तती = दो सन्तानें। तनयः = पुत्र। तनया = पुत्री। मधूकः = महुआ। पत्युः = पति का। परिधाय = पहन कर। पुष्टिदम् = पोषक तत्वों से युक्त। प्रणम्य = प्रणाम करके। लघुपरिवारेणैव = लघु परिवार के द्वारा ही।

## अभ्यास

1. उच्चारण करें-

सप्तत्रिंशद्वर्षीयः, द्वात्रिंशद्वर्षीया, लघुपरिवारेणैव,

तनयायाश्च, स्वास्थ्यप्रदम्, अर्हति।

2. एक पद में उत्तर दें-

(क) जगत्पालस्य परिवारः कीदृशः ?

(ख) जगत्पालः कीदृशः कृषकः अस्ति ?

(ग) कला कीदृशी गृहिणी अस्ति ?

(घ) लघुपरिवारः कीदृशः परिवारः अस्ति ?

3. निम्नलिखित पदों के लिङ्ग, विभक्ति एवं वचन लिखें -

पद लिङ्ग विभक्ति वचन

तनया = ...... ...... ......

जगत्पालस्य = ...... ...... ......

कृषकः = ...... ...... ......

आज्ञया = ...... ...... ......

स्थानेषु = ...... ...... ......

4. निम्नलिखित पदों का सन्धि-विच्छेद करें -

(क) चाधिक्यम् = .................................. + .....................................

(ख) लघुपरिवारेणैव = .................................. + .....................................

5. रिक्त स्थानों की पूर्ति करें -

(क) तस्य पत्नी ................. अस्ति।
(ख) तयोः ...............सन्तती स्तः।
(ग) विवेकः ............... वर्षीयः अस्ति।
(घ) तस्य गृहे एका ........धेनुः वर्तते।

6. हिन्दी मंे अनुवाद करें -

(क) अयं लघुपरिवारः एकः आदर्शपरिवारः अस्ति।

(ख) विवेकः प्रतिभा च कीदृशं भोजनं कुरुतः।

(ग) आहारस्य वस्त्रस्य गृहस्य च व्यवस्था समुचितरूपेण भवति।

(घ) लघु परिवारेणैव समाजस्य राष्ट्रस्य च कल्याणं भवितुमर्हति।

7. संस्कृत में अनुवाद करें -

(क) उसकी पत्नी का नाम कला है।

(ख) दोनों दम्पती सुख से निवास करते हैं।

(ग) विवेक ग्यारह वर्ष का है और प्रतिभा सात वर्ष की है।

(घ) जगत्पाल एक उद्योगी और कुशल कृषक है।

(ङ) उसके घर में एक सफेद रंग की गाय है।

शिक्षण संकेत-

1. लघु परिवार की विशेषताओं पर कक्षा में चर्चा कराएँ।

2. लघु परिवार के सम्बन्ध में अपने विचार लिखने का अवसर दें।

**धर्मेण हीनाः पशुभिः समानाः।**